श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
श्रीगुरुपवनपुराधीशाय श्रीकृष्णाय परब्रह्मणे नमः

श्री मेल्पत्तूर् नारायणभट्टतिरेः कृतिषु

# ॥ श्रीमन्नारायणीये एकोनषष्टितमं दशकम् ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्रीमन्नारायणीये एकोनषष्टितमं दशकम् ॥

## वेणुगानवर्णनम्

त्वद्वपुर्नवकलायकोमलं
    प्रेमदोहनमशेषमोहनम्।
ब्रह्म तत्त्वपरचिन्मुदात्मकं
    वीक्ष्य सम्मुमुहुरन्वहं स्त्रियः ॥ 59.1 ॥

मन्मथोन्मथितमानसाः क्रमा -
    त्त्वद्विलोकनरतास्ततस्ततः।
गोपिकास्तव न सेहिरे हरे
    काननोपगतिमप्यहर्मुखे ॥ 59.2 ॥

निर्गते भवति दत्तदृष्टय -
    स्त्वद्गतेन मनसा मृगेक्षणाः।
वेणुनादमुपकर्ण्य दूरत -
    स्त्वद्विलासकथयाऽभिरेमिरे ॥ 59.3 ॥

काननान्तमितवान् भवानपि
    स्निग्धपादपतले मनोरमे।
व्यत्ययाकलितपादमास्थितः
    प्रत्यपूरयत वेणुनालिकाम् ॥ 59.4 ॥

मारबाणधुतखेचरीकुलं
    निर्विकारपशुपक्षिमण्डलम्।

द्रावणं च दृषदामपि प्रभो
    तावकं व्यजनि वेणुकूजितम् ॥ **59.5** ॥

वेणुरन्ध्रतरलाङ्गुलीदलं
    तालसञ्चलितपादपल्लवम् ।
तत् स्थितं तव परोक्षमप्यहो
    संविचिन्त्य मुमुहुर्व्रजाङ्गनाः ॥ **59.6** ॥

निर्विशङ्कभवदङ्गदर्शिनीः
    खेचरीः खगमृगान् पशूनपि ।
त्वत्पदप्रणयि काननं च ताः
    धन्यधन्यमिति नन्वमानयन् ॥ **59.7** ॥

आपिबेयमधरामृतं कदा
    वेणुभुक्तरसशेषमेकदा ।
दूरतो बत कृतं दुराशये -
    त्याकुला मुहुरिमाः समामुहन् ॥ **59.8** ॥

प्रत्यहं च पुनरित्थमङ्गना -
    श्चित्तयोनिजनितादनुग्रहात् ।
बद्धरागविवशास्त्वयि प्रभो
    नित्यमापुरिह कृत्यमूढताम् ॥ **59.9** ॥

रागस्तावज्जायते हि स्वभावा -
    न्मोक्षोपायो यत्नतः स्यान्न वा स्यात् ।
तासां त्वेकं तद्द्वयं लब्धमासीत्
    भाग्यं भाग्यं पाहि मां मारुतेश ॥ **59.10** ॥

॥ इति श्रीमन्नारायणीये एकोनषष्टितमं दशकं समाप्तम् ॥